क्षञ्ज्यमानः, क्षञ्ज्यमानः, चिक्षञ्जिष्यमाणः, चाक्षञ्ज्यमानः ;

क्षञ्जितुम् , क्षञ्जयितुम् , चिक्षञ्जिषितुम् , चाक्षञ्जितुम् ;

[1]क्षञ्जा, क्षञ्जना, चिक्षञ्जिषा, चाक्षञ्जा ;

क्षञ्जनम् , क्षञ्जनम् , चिक्षञ्जिषणम् , चाक्षञ्जनम् ;

क्षञ्जित्वा, क्षञ्जयित्वा, चिक्षञ्जिषित्वा, चाक्षञ्जित्वा ;

प्रक्षञ्ज्य, प्रक्षञ्ज्य, प्रचिक्षञ्जिष्य, प्रचाक्षञ्ज्य ;

क्षञ्जम् २, क्षञ्जित्वा २, } [2]क्षञ्जम् २, क्षाञ्जम् २, क्षञ्जयित्वा २, } चिक्षञ्जिषम् २, चिक्षञ्जिषित्वा २, } चाक्षञ्जम् २ ; चाक्षञ्जित्वा २. }

## (296) "क्षणु हिंसायाम्" (VIII-तनादिः-1465. सक. सेट्. उभ.)

क्षाणकः-णिका, क्षाणकः-णिका, चिक्षणिषकः-षिका, [3]चङ्क्षणकः-णिका ;

क्षणिता-त्री, क्षाणयिता-त्री, चिक्षणिषिता-त्री, चङ्क्षणिता-त्री ;

[4]क्षण्वन्-[A]ती, क्षाणयन्-न्ती, चिक्षणिषन्-न्ती ; —

क्षणिष्यन्-न्ती-ती, क्षाणयिष्यन्-न्ती-ती, चिक्षणिषिष्यन्-न्ती-ती ; —

क्षण्वानः, क्षाणयमानः, चिक्षणिषमाणः, चङ्क्षण्यमानः ;

क्षणिष्यमाणः, क्षाणयिष्यमाणः, चिक्षणिषिष्यमाणः, चङ्क्षणिष्यमाणः ;

[5]क्षत् -क्षतौ-क्षतः ; — — —

[6]क्षतम्-तः, क्षाणितः, चिक्षणिषितः, चङ्क्षणितः-तवान् ;

क्षणः, क्षाणः, चिक्षणिषुः, चङ्क्षणः ;

---

1. धातोः षित्त्वात् 'षिद्भिदादिभ्योऽङ्' (3-3-104) इत्यङ् ।
2. घटादिषु पाठसामर्थ्यात् अनुपधात्वेऽपि 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-1-93) इति दीर्घविकल्पः ।
3. 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इत्यभ्यासस्य नुक् ।
4. 'तनादिकृञ्भ्य उः' (3-1-79) इति उः विकरणप्रत्ययः । यण् ।
5. "'गमः क्वौ' (6-4-40) इत्यत्र 'गमादीनामिति वक्तव्यम्' इति उपसंख्यानात् अनुनासिकलोपः तुक् ।" इति 'क्षतात् किल त्रायत' इति (रघुवंशे 2-53) श्लोकव्याख्यायां मल्लिनाथः ।
6. 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' (6-4-37) इत्यनुनासिकलोपः ।

A. 'तन्वन् स मय्वभुवि सातरसः स्वबन्धून् अक्षण्वतां क्षितिकरः मुदमर्णुवानः ।' धा. का. 3-4.